## 6.1.1 The governance of the Institution is reflective of an effective leadership in tune with the vision and mission of the University

**संस्थायाः दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।**

अथ शास्त्राध्ययनपरम्परायाः परिरक्षणाय प्रतिष्ठापितस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य 'श्रुतं मे गोपाय' इतीदं ध्येयवाक्यमस्य ध्येयं दूरदृष्टिं च साङ्केतिकरूपेण अभिव्यनक्ति। अयं विश्वविद्यालयः पारदर्शकप्रशासनप्रणाल्याः क्रियान्वयनस्य फलस्वरूपेण केन्द्रीयकार्यालयेन सह संकाय संयुक्तः व्याप्तश्च वर्तते। व्यापकस्यास्य विश्वविद्यालयस्य दृष्टिरपि व्यापिका एव अस्ति। दृष्टिपूतं न्यसेत् पादम् इति वचनमभ्युपगम्य विश्वविद्यालयः समेधमानः वर्तते।

**दूरदृष्टिः प्रशासनञ्च**

1. केन्द्रीयकार्यालयस्य विविधसंकायानां च भवनप्रकोष्ठप्रयोगशालाक्रीडाङ्गणावासस्थानानां ग्रन्थालयवाचनालयकार्यालयादीनां आसन्दपीठोपकरणदृश्यश्रव्यसंसाधनानां च अभिवृद्धिसम्पादनं स्तरोन्नयनञ्च।
2. विविधशैक्षिकप्राशासनिकसौकर्याणां प्रकल्पनपुरस्सरं संस्थायाः पुनारचना।
3. राष्ट्रियशिक्षानीतेः (NEP–2020) क्रियान्वयनपुरस्सरं भारतीयज्ञानप्रणाल्याः तदन्तर्गतभाषाकलासंस्कृतेश्च प्रचाराय विकासाय च अपेक्षितानां सार्थकमार्गोपायानम् अन्ववेषणम्।
4. विश्वविद्यालये संस्कृतविभागानां संकायानां च अध्ययनानुसन्धानार्थम् अपेक्षितानाम् अन्ताराष्ट्रियस्तरीयसौकर्याणां प्रकल्पनम् अन्ताराष्ट्रियाध्ययनकेन्द्राणां प्रतिष्ठापनं च ।
5. विश्वविद्यालयस्य संकायानां विभागानां च पुनः सङ्घटनपुरस्सरं नवाचारस्य प्रौद्योगिक्याश्च अनुप्रयोगपुरस्सरं छात्रेभ्यः अध्ययनाय स्वतन्त्रावसरप्रकल्पनम् ।
6. वैश्विकस्तरे संस्कृतभाषायाः शास्त्राणाञ्च प्रचाराय प्रसाराय च अपेक्षितस्य उत्कृष्टोपक्रमस्य उद्विकासः ।
7. संस्कृत–पालि–प्राकृताद्यानां प्राचीनभारतीयभाषाणां संरक्षणप्रसारविकासैः सह नवसन्ततेः अपेक्ष्यानुरूपायाः भाषाध्ययनाध्यापनपरम्परायाः सर्जनम्। सरलमानकसंस्कृतस्य समाश्रयणं च।
8. संस्कृतवाङ्मये निबद्धानां तत्त्वानां गवेषणपुरस्सरम् अस्य वाङ्मयस्य सर्वसाधारणीकरणम्।
9. धनस्य समयस्य शक्तेश्च अल्पमात्रेण अनुप्रयोगपुरस्सरं सरलसंस्कृतेन प्राविधिकोपकरणानां साहाय्येन च गभीरशास्त्रीयविचाराणां सरलशैल्या प्रस्तुतीकरणम् ।
10. संस्कृतवाङ्मये सन्निहितानां तत्त्वानाम् अध्ययनाय अनुसन्धानाय शिक्षणाय च उत्सुकेभ्यः जनेभ्यः देश–काल–जाति– लिङ्ग–स्तरादीनां बाधकानां वारणपूर्वकम् अवसरकल्पनम् इत्यादीनि विश्वविद्यालयस्य अग्रदृष्टौ सन्ति।

**ध्येयं प्रशासनञ्च –**

अनुदिनं लोकसम्मतानि ध्येयानि ध्यायतः जनस्यध्सङ्घटनस्य ध्येयपदार्थविशेषेषु सङ्गः सहजतया सङ्काय सञ्जायते। एतदनु ध्येयेषु पारम्परिकशास्त्रीयविषयविशेषेषु विश्वविद्यालयस्य सङ्गः सञ्जातोऽस्ति। विश्वविद्यालयस्य विभिन्नेषु सङ्काय परिसरेषु विभिन्नानां शास्त्राणाम् अध्ययनाध्यापनपरम्परा अवच्छिन्नरूपेण प्रचलति। देशस्य विदेशस्य च छात्रेभ्यः स्वाभीष्टं शास्त्रीयं विषयं स्वाभीष्टविभागे पठितुमत्र अवसरः प्रकल्पितोऽस्ति। यत्र विश्वं भवत्येकनीडम् इतीमां वैदिकसूक्तिं ध्यायतः विश्वविद्यालयस्य प्रशासनेन भवनेषु एतदर्थं सुव्यवस्था परिकल्पिता अस्ति । पुनः भारतीयज्ञानप्रणाल्याः संरक्षणोपायम् अनुक्षणं ध्यायन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः प्राचीनज्ञानविज्ञानयोः प्रचारकान् संरक्षकान् च विना भेदभावं प्रोत्साहयति। विश्वविद्यालयस्य विशिष्टाः योजनाः एतदर्थमेव सक्रियाः सन्ति। तासु प्रमुखाः यथा – आदर्शसंस्कृतमहाविद्यालयाःध्शोधसंस्थानानि

- **स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्**

विश्वविद्यालयः प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे लालभवने प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। अध्यापकप्रशिक्षणम् आधुनिकतन्त्राणि आश्रित्य प्रवर्त्यते। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः विश्वविद्यालयेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

- **विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्**

संस्थानस्य सर्वेष्वपि विभागेषु बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः दापत्ये तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते ।